# श्रीसत्यसायि सत्यनारायणकथा



*Sanskrit Poetry*
*(Devanagari)*

# अथ प्रथमोध्यायः

अथाऽतो सत्यसायीशं वन्देऽहं मम सद्गुरुं
वदामि काव्यरुपेण सत्यसायि कथामृतं।।

एकोनविंशशतके षड्विंशत्युत्तरान्विते
नवम्बराख्ये मासेस्मिन् त्रयोविंशे दिने शुभे।।

भगवद् भक्त लोकानां भाग्यपूरितवैभवात्
भगवान् सायि बाबायाः दिव्य जन्म बभूव च।।

माता वै ईश्वराम्बा च पिता वेन्कप्पराजु च
पुट्टप्पर्त्यां जनिं प्राप भगवान् सत्य सायिराम्।।

नारायणस्य भक्ताऽसीत् ईश्वराम्बा सती सदा,
नारायणप्रसादेन सायिमाता बभूव च।।

''तस्यावतारसंबद्धां कथामेतां वदाम्यहं'
इत्युवाच महासाध्वी ईश्वराम्बा कदाचन।।

कूपाज्जलं समुन्नेतुं ईश्वराम्बा यदा गता
व्योमादुत्पतितं गर्भे तेजः पुञ्जं महाद्भुतं।।

भूमौ निपतिता साम्बा मूर्छितेव च तत् क्षणं
श्वश्रोः सदुपदेशेन न किंचित् वक्तुमुद्यता।।

साक्षात् नारायणस्यैवं अवतारमहाद्भुतं
सत्यसायीभगवतः कारणं पुण्यजन्मनः।।

गर्भस्य नवमे मासे ईश्वराम्बागृहे स्वयं
वाद्योपकरणेभ्यश्च मधुरं गानमागतं।।

एकदा ईश्वराम्बायाः श्वश्रू कृतवती स्वयं
सत्यनारायणाख्यस्य व्रतपूजां सविस्तरं।।

पूजाप्रसादं भुक्त्वैव श्रद्धाभक्तिसमन्वितं
ईश्वराम्बा प्रसूते च सत्यं नामैव बालकं।।

अतीव सुन्दरं गात्रं मनोहरमुखाम्बुजं
दत्वा दर्शनसायूज्यं बालसत्यो विराजितः।।

दृष्ट्वा तु चलनं किंचित्, शय्यायां बालकस्य च
मार्गणे कृते दृष्टो शेषनागो बहिर्गतः।।

विकुण्ठलोके वैकुण्ठे शेषतल्पाधिशायिनं
अदृष्ट्र्वा तत्र कुत्रापि शेषनागस्त्विहागतः।।

शाकाहारप्रियो सत्यः न गतः कस्यचित् गृहं
यत्र मांसोपि पच्येत, ह्यहिंसाव्रतमाचरन्।।

कर्णं सुब्बम्म नामैका भक्ताऽसीत् स्वगृहान्तिके
तस्मिन् गृहे वर्तमानो बालसत्यः सुवर्धितः।।

कर्णं सुब्बम्मया प्राप्तो योगोयं परमोत्तमः
यशोदा भवितुं भाग्यं सायिकृष्णस्य जन्मनि।।

गृहं सत्यस्य संप्राप्य याचकाः नैव निर्गताः
अभुक्ताः शून्यहस्ताः वा बालसत्यप्रचोदनात्।।

कदाचित् स्वयमेवापि त्वभुक्तो दत्तभक्षणः
मातुः दुःखस्य पात्रत्वं स चाप्नोत् दानशीलकः।।

अनश्नन्नपि सत्यो वै सन्तोषेणैव भावितः
कुतस्त्वं भक्षणं प्राप्तश्चेति प्रश्ने कृते सति।।

स्वहस्तं दर्शयन्नाह साधुवृद्धाच्च स्वीकृतं
प्रमाणहेतुना विवृतं हस्तं सौरभ्य पूरितं।।

कौमार आगते सत्ये विद्यार्थं चैव निर्गतः
बुक्कप्पट्टण ग्रामाय पुट्टप्पर्तिं विहाय च।।

सत्यो तत्रापि संदृष्टः गुरुणां सुहृदामपि
हितकारी सत्यवादी मितभाषी प्रियंकरः।।

एकदा वर्गपर्यन्तं स्थातुं पीठे तु दण्डितः
यतः स गुरुणा दृष्टः वर्गे चाश्रद्धया स्थितः।।

वर्गान्ते गमनायैव आरब्धोपि गुरुर्वरः
आसन्दबन्धनान्नूनं न शशाक निवर्तितुं।।

सत्यस्यान्यो गुरुर्वरः महबूब्खाननामकः
सुस्थितं बालंक सत्यं पीठस्योपरि दृष्टवान्।।

महबूब्खाननिर्देशात् यदा सत्यो विमोचितः
शिक्षायाचरणान्नूनं बन्धनात् मोचितो गुरुः।।

एतेनाद्भुतकार्येण चान्येन बहुनापि च
सत्यो बभूव वै तेषां अद्भुतो बालकः प्रियः।।

कश्चन शकटस्वामी यस्याश्वं नष्टवान् स्वयं
अश्वस्य मार्गणं कुर्वन् सत्यमापः सहायकं।।

सत्यो दर्शितवानश्वं अक्लेशेनाचिरेण च
सन्तुष्टः शकटस्वामी सायिभक्तो बभूव च।।

अन्ये च शकटाधीशाः प्रार्थयामासुः बालकम्
स्वं स्वं यानं समारोढुं तेषां सौभाग्यहेतवे।।

**इति प्रथमोध्यायः**

# अथ द्वितीयोध्यायः

वर्षे चतुर्दशे सत्य स्त्वेकदा मूर्छितोऽभवत्
सर्वेपि चिन्तयामासुः सत्यो वृश्चिकदंशितः।।

यतः सः पतितो भूमौ पादांगुष्ठं गृहीतवान्
सत्यस्तु रक्षितुं भक्तं स्वशरीरात् बहिर्गतः।।

पूर्वं तु घटना चैवं नाऽभूदेव कदाचन
अतस्ते वृश्चिकस्यास्य मार्गणाय रतास्तदा।।

तेषां तु विफलो यत्नः कारणं व्यक्तमेव च
सत्यस्य मूर्छिताहेतुः वृश्चिको नैव कश्चन।।

परेद्युश्चापि सत्यो वै मूर्छितोऽभूत् गृहान्तरे
उवाच एवं सत्यश्च तदा सद्बोध आगतः।।

मुत्यालम्मेति नामाम्बा देवता कुपितास्ति च
सम्प्रीतिहेतवे चोक्तं नालिकेरसमर्पणं।।

नारिकेलफलं नूनं यदा च छेदितं तदा
त्रिखण्डेन विभक्तोऽभूत् अहो बत महाद्भुतं।।

गृहे स्थित्वैव सत्येन एषा वार्ता च श्राविता
सत्यस्य बान्धवाः सर्वे आश्चर्यचकितोऽभवन्।।

अचिन्तयन् च सत्यो वै मनोरोगेण पीडितः
सत्यस्य मातापितरौ आकुलौ च समागतौ।।

चिकित्सार्थं तदा नीतः गृहे दूर्मन्त्रवादिनः
तत्रासौ क्रूरपीडाम् च अनुभूतो तितिक्षया।।

मुण्डनं शिरसः कृत्वा कृतं तत्र व्रणं बलात्
व्रणे क्षारजलं क्षिप्त्वा सत्यश्च पीडितो मुहुः।।

पूत्रस्यैवंविधां पीडां सोढुं माता शशाक न
सत्यं मोचितुमुद्युक्ता ह्यपेक्षा सा कृतास्वयं।।

यदा सत्यो विमुच्येत शोकदुःखभयात् तदा
प्रत्यानेष्यामि तं शीघ्र मित्युक्त्वा मन्त्रवादिनं।।

स्वगृहं प्रतियात स्सः पीडामुक्तो च सत्वरं
स्वेन निर्दिष्टौषधेन क्रमेण सुखमागतः।।

पीडायाः मुक्त सत्यश्च कृतो वेदान्तभाषणं
ग्रामवासिनमुद्दिश्य तेषां हितकराय च।।

सायिबाबेति नाम्नैव साघुश्च परिमर्शितः
सत्यस्यैतत् स्वभावं तु दृष्ट्रवा तस्य पिता तदा।।

एकं दण्डं समाघाय क्रुद्धो शीघ्रं समागतः
पप्रच्छ सत्यमेवं तु ''सत्यं ब्रूहि च कोसि मे''।।

प्रत्युवाच स सत्यो हि ''सायिबाबा त्वहं ननु
यूयं तु शुद्धं कुरुथ स्वगृहाणि मनांसि च।।

एवं शूद्धीकृते गेहे ह्यहं नूनं वसामि च'
एवमुक्तं तु सत्येन वचस्तै श्रद्धया श्रूतं।।

दण्डो निपतितो हस्तात् पिता तं प्रत्युवाच च
''यदि त्वं सायिबाबासि दृष्टान्तं दर्शय स्वयं''।।

बालसत्यः स्वहस्तेन कुन्दपुष्पाणि क्षिप्तवान्
तदा तानि स्वयं तत्र ''सायि बाबे' ति दृष्टवान्।।

एतदद्भुत दृश्यं तु दृष्ट्वा सर्वेपि ग्रामिणः
तमाहु सायिबाबेति श्रद्धाभक्तिसमन्विताः।।

**इति द्वितीयोद्यायः**

# अथ तृदीयोद्धयायः

बालसत्यो युवा भूत्वा चमत्कारान् ददर्श च
तान् दृष्ट्रवा तस्य भक्ताश्च तमाहु स्वामिनित्यपि।।

स्वामी तु बान्धवैस्साकं हम्पी ग्रामं गतः पुरा
विरुपाक्षस्य क्षेत्रेपि गतवान् दर्शनाय च।।

यदा स्वबान्धवाः सर्वे मन्दिरान्तर्गतास्तदा
स्वामी तु स्थितवानेको बहिरेव चिरं सुखं।।

ते सर्वे स्वामिनं दृष्ट्रवा विरुपाक्षस्य विग्रहे
आश्चर्यवन्तो भूत्वा हि बहिर्गत्वा व्यलोकयन्।।

मन्दिरप्राङ्गणे चैव स्थितो स्वामी हसन्नपि
भूयश्चापि स दृष्टो हि सुस्थितश्चैव विग्रहे।।

एतेनाद्भुतदृश्येन स्वामी तानपाठयत्
श्रद्धयान्वितभक्तानां सर्वं सायिमयं जगत्।।

एकस्मिन् वासरे स्वामी शीघ्रं तु गृहमागतः
विद्यालयात् निवृत्तश्च क्षिप्त्वा ग्रन्धानभाषत।।

''माया त्यक्तवती मां च यूष्माकं नाहमित्यपि
मम भक्ताः प्रतीक्षन्ते मां तेषां रक्षणाय च''।।

एवं श्रुत्वा ज्येष्ठ पत्नी ह्यपश्यत् स्वामिनं तदा
स्वामिनो निर्गतो तेजः प्रभापूरमलौकिकं।।

चक्षुर्निमीलिता दृष्टा आश्चर्यचकितापि सा
माता ईश्वराम्बा च प्रार्थयामास स्वामिनं।।

''अन्यत्र मा गम पुत्र, पुट्टप्पर्तिं विहाय च
इह स्थित्वैव रक्षस्व स्वभक्तान् प्रीतिपूर्वकं।।'

अतः स्वामी तु तत्रैव चावसत् स्वगृगान्तिके
सह सुब्बम्मयाश्चैव सृष्ट्रवा भजनमन्दिरं।।

सा तु प्रियतमा भक्ता, स्वामिनः सेविका सदा
तस्याः गृहेपि च स्वामी त्ववसत् चिरकालतः।।

देशदेशान्तरात् तत्र स्वामिभक्ताः समागताः
स्वामिनो दर्शनायैव तस्यानुग्रहसिद्धये।।

यदा भक्षणसामग्र्याः न्यूनता दर्शिता तदा
स्वामिना तत्र चैवायं समस्या दूरिता स्वयं।।

भक्षणस्योपरिश्चैव नालिकेरद्वयं भिदन्
तयोर्जलं क्षिपन् तत्र स्वामी तानवर्धयत्।।

यदा भक्तजनानां च संख्या संवर्धिता तदा
द्वितीयं मन्दिरं चापि भक्त्या भक्तैः सुनिर्मितं।।

अर्चको नाम लक्ष्मय्या स्वामिनं दष्टुमेकदा
सखापि तस्य जाया च पुट्टप्पर्तिं सभागताः।।

सा जाया बहुधा क्लिष्टा मनोरोगेण वै चिरं
तद्रोगशमनार्थं हि स्वामिनश्चान्तिके गता।।

‘‘स्नानानन्तरमागत्य कुरुथात्रैव चासनं
अहमत्रागमिष्यामि’ इत्युवाच महामतिः।।

ततः स्वामी तत्र गत्वा विभूतिं सृष्टवान् स्वयं
तस्यै प्रादात् कृपासिन्धु, भोक्तुं घर्तुं च श्रद्धया।।

विभूतिं श्रद्धया भुक्त्वा रोगमुक्ता बभूव सा
स्वामिनं ते नमस्कृत्य गतवन्तो गृहाय च।।

कर्णं सुब्बम्मया प्रीत्या बहूनि सुकृतानि च
स्वामिना कारितान्येव वार्धक्ये तु समागते।।

एकस्मिन् वासरे स्वामी बाँगलूर नगरं गतः
सुब्बम्मा दुःखिताभूच्च वार्ता चैषा यदा श्रूता।।

क्षीणिता सापि संजाता अदृष्ट्र्वा तत्र स्वामिनं
मनः संलग्नमेवासीत् स्वामिपादे तदापि च।।

तस्याः नामजपश्चापि क्रमेण स्थगितोऽभवत्
श्वासोच्छवासं च शुष्कोऽभूत् अचिरेण मृताऽपि च।।

सुब्बम्मायां मृतायां च स्वामी तत् ज्ञातवान् स्वयं
बांगलूर नगरात् शीघ्रं पुट्टप्पर्तिं समागतः।।

सुब्बम्मायाः समीपस्थः स्वामी ह्येवमभाषत
“सुब्बम्मे, हे सुब्बम्मे त्वं मुखं उद्घाटय स्वयं”।।

स्वामिनः शब्दमाकर्ण्य सापि जागरिता ह्यभूत्
नेत्र उन्मील्य साऽपश्यत् स्वामिनं भक्तिपूर्वकं।।

स्वामी स्वेनैव हस्तेन गंगातीर्थं मुखे ददौ
सुब्बम्मा तु झटित्येव स्वामिपादे लयं गता।।

यदा भक्तास्तु सम्पूज्य प्रार्थयन्ते च स्वामिनं
स्वामी वै पुरतस्तेषां आविर्भूतो भवेत्तदा।।

भक्तानां इष्टदेवस्य रुपं घृत्वा यदा स्थितः
स्वामिनो दर्शनं प्राप्य तेषां भक्तिरवर्धत।।

एकदा कृष्णामाचारी त्यघिवक्ता सुदुष्कृतः
स्वामिनो दुष्प्रचाराय पुट्टप्पर्तिं समागतः।।

स्वामी तं नीतवानेकं प्रकोष्ठं मन्दिरस्य च
चक्षुर्निमील्य तत्रैव स्थातुं निर्दिष्टवानपि।।

यदा सः चक्षुरुन्मील्य ऐक्षतः पुरतः स्वयं
तदा स दृष्टवान् षिर्ड्यां समाधिस्थानमण्डपं।।

सोपश्यदर्चकं तत्र पूजां कुर्वन् समर्चयन्
हनूमन्तं निंबवृक्षं गुरुस्थानं तथैव च।।

षिर्डिसायीसमाधिं च दृष्ट्रवा सः प्रीतिपूर्वकं
स्वामिनं च नमस्कृत्य क्षमां प्रार्थितवानपि।।

तदा स्वामी कृपापूर्णः भक्तप्रियो दयामयः
गृहं प्रेषितवान् दत्वा क्षमां सानुग्रहं मुदा।।

ये यथा तं प्रपद्यन्ते तान् तथैव भजत्यपि
सर्वशक्तो सत्यसायी, सर्वान् रक्षितुमुत्सुकः।।

**इति तृदीयोध्यायः**

# अथ चतुर्थोध्यायः

साकम्मा नाम भक्ताऽसीत् कृषका दानतत्परा
अन्नवस्त्रादि द्रव्याणि ददौ सर्वजनाय च।।

मैसूर् राजा ददौ नाम तस्यै "धर्मपरायणा"
तस्या गुणानि दृष्ट्वैव सा तथा अनुमोदिता।।

एकदा सा यदा स्वस्य पूजायां च रता गृहे
जनद्वयं तदा याने तत्रैव च समागतं।।

एकश्चासीत् युवा नूनं अपरो वृद्ध एव च
श्वेतरोमावृतो वृद्धः विभूतिं च धरन्नपि।।

बालो षोडशवर्षीयः शकटे पुरतस्थितः
वृद्धो ह्यजिनवासी च शकटे पृष्ठतस्थितः।।

दृष्ट्रवा तौ आगतौ शीघ्रं साकम्मायाः गृहान्तरे
नत्वा पृष्टवती साध्वी केनोद्देशेन चागतौ।।

कैलासे नाम संघेस्मिन् अङ्गत्वाय समागतौ
दत्वा सहस्ररुप्याणि अङ्गत्वं स्वीकृतं तदा।।

रुप्यकाणि तु स्वीकृत्य प्रतिदत्तानि शीघ्रतः
पुनर्मिलाम इत्युक्वा सन्तोषेण च निर्गतौ।।

पुनः सः बालको दृष्टो बांगलूर नगरेपि च
मित्रस्य तु गृहे तत्र भाषणं च कृतं तया।।

वृद्धो यदा परामृष्टः वृद्धरुपेण दर्शितः
पुनश्च बालकस्यैव रूपं घृत्वा स्थितोपि च।।

आश्चर्यं दृश्यमेतत्तु दृष्ट्रवा साकम्मया पुनः
पृष्टश्च बालको नूनं किमेषो दृश्यविभ्रमः।।

"त्वमेवागतवान् पूर्वं वृद्धेन सह मे गृहं
सहस्ररुप्यकाण्येवं प्राप्य प्रत्यर्पितानि च।।

इत्यस्य कारणं ब्रूहि बालस्त्वं प्रीतिपूर्वकं"
एवं च प्रार्थितो बाल स्तामेवं प्रत्यभाषत।।

"वर्षेभ्यो बहुशः पूर्वं रुप्यकाणि सहस्रकं
ऋणमासीच्च नूनं ते तन्निवर्तितुमागतः"।।

यदा सः प्रोक्तवानेवं साकम्मां च विशेषतः
भक्त्याश्चर्येण चैवेषा नान्यत् किंचिदभाषत।।

सन्तूष्टः सततं स्वामी पुट्टप्पर्त्यां विराजितः
मन्दिरे सह भक्तैश्च कुर्वन् संभाषणं मुदा।।

अकस्मादेव तेनोक्तो "गोली मा प्रेषयेति" च
सत्वरं मूर्छितो भूत्वा शेते स्वामी च निश्चलः।।

एकघण्टा यदा याता स्वामी चैवमभाषत
तत्रस्थितं भक्तमेकं "तन्त्रीवार्तां तु प्रेषय"

"ते भुशुण्डी मया प्राप्ता, अतस्वं मा व्यथां कुरु"
भूशुण्डीति वचो त्यक्त्वा तन्त्रीवार्ता तु प्रेषिता।।

चतुर्दिनेभ्यः पश्चात्तु भोपालात् पत्रमागतं
तन्त्रीवार्तां तु लब्ध्वैव चेदं पत्रं तु प्रेषितं।।

एको सुरक्षाधिकारी ह्यासीत् पत्रस्य प्रेषकः
गृहे तस्यैव संभूता वार्ता पत्रे च प्रेषिता।।

कार्यालये प्रवृत्ताच्च कारणात् व्याकुलोपि सन्
आत्महत्याय यत्नोपि कृतवान् स्वगृहान्तरे।।

आकाशेन यदा एका गोली तेन परीक्षिता
झटित्येव स रुद्धश्च स्वामिना बहुदूरतः।।

सत्वरं दृष्टवान् तत्र सहपाठिनमागतं
भार्यया सह भृत्येन यदा द्वारमपावृतं।।

भुशुण्डीं तु क्षणं गुप्त्वा तेषां स्वागतमूचिवान्,
तैः सह कुशालं पृच्छन् बहु सन्तोषमागतः।।

तेषामेवान्यमित्रस्य गृहं याताश्च ते यदा
तदा सः पुनरेवापि भुशुण्ड्याः मार्गणे रतः।।

किन्तु तस्य प्रयत्नश्च विफलः समभूत्तदा
तन्त्रीवार्ता तदा लब्ध्वा स्वामिना प्रेषिता स्वयं।।

तत्र सोऽपठत् शीघ्रं "करणं मे करे स्थितं"
स्वामिना प्रेषिता वार्ता तस्य कर्णामृतोऽभवत्।।

अस्माकं तु प्रियो स्वामी सर्वान् भक्तान् सदैव च
रक्षिष्यति च सर्वत्र इत्यास्मिन् न संशयः।।

प्रार्थयन्ते च ये भक्ताः स्वामिनं श्रद्धयान्विताः
स्वामी तेषां समीपे तु अचिरेणाधिगच्छति।।

सत्यं धर्मश्च शान्तिश्च प्रेमाप्यंगानि वै गूरोः
स्वामिनश्चावतारो हि साक्षादेव महाद्भुतः।।

**इति चतुर्थोध्यायः**

# अथ पञ्चमोध्यायः

एकदा प्रियभक्तस्य गृहं स्वामी समागतः
तत्रैव स्वामिनं द्रष्टुं आगताः बहवो जनाः।।

ते सर्वे स्वामिने दातुं पुष्पाणि च फलानि च
भक्त्या समर्पितुं चैव समाहृत्य समागताः।।

एको पादुकनिर्माता तत्रागच्छत् सकौतुकं,
सुगन्धपूरितं पुष्पं हस्तेन परिलालयन्।।

सुस्मेरवदनं दृष्ट्रवा गूरोः भक्तिपुरस्सरं
स भक्तो विस्मितो भूत्वा स्थितो निश्चलमेव च।।

स्वामी तं प्रोक्तवानेवं ''आगच्छ निकटे मम''
तदा स गतवान् शीघ्रं पुष्पमर्पितवानपि।।

''बंगारु त्वं किमिच्छसि'' इति पृष्टः स चोक्तवान्
''स्वामी त्वं गृहमागत्य अनुगृह्णातु वश्चिरं।।

तस्य प्रतिवचनं श्रुत्वा बाबोवाच ''तथास्तु'' च
स्वगृहं प्रतियातश्च सन्तुष्टो भक्तिमान् सुखं।।

स्वकर्मनिरतो भूत्वा यदा सः स्थितवान् पथि
तदा स्वामी तत्र गत्वा कारयानं स्थगितं मुदा।।

स्वयानं तं समारुह्य यातो तस्य गृहं प्रति
तत्र सः स्वामिनं भक्त्या मुदा स्वीकृतवानपि।।

दातुं तस्मै तु किंचिच्च नासीत् तस्य गृहान्तरे
भोज्यवस्तूनि निर्मीय तेभ्यो दत्तानि स्वामिना।।

लज्जितं तं समाश्वास्य इदमाह दयापरः
''स्वीकर्तुं नैव किंचिच्च अहमत्र समागतः।।

अनुगृह्णातुमेव त्वां, मा वृथा चिन्तनं कुरु
त्वया सहाहं वर्तिष्ये सदा सर्वत्र सर्वथा।।''

इत्युक्त्वा गतवान् स्वामी दत्वा तेषामनुग्रहं
ततः परं गृहं तस्य चाऽभूत् सुन्दरमन्दिरं।।

यदा स्वामी गतो ट्रिच्चि जनाः केचन सत्वरं
वृथा तस्य दुरारोपं कर्तुं तत्र समागताः।।

सायंकाले यदा स्वामी कृतवान् च प्रभाषणं
तत्रैकं बालकं मूकं जुहाव सदसि स्वयं।।

स्वामी प्रेम्णा तमालोक्य नाम वक्तुं च ऊचिवान्
तदा स बालकोवाच ''वेन्कट्नारायण''स्त्वपि।।

मूकं तं बालकं स्वामी वाचालमकरोत् स्वयं
दूर्जनाश्च तदा सर्वे भक्त्या गुरुमपूजयन्।।

तिरुवण्णमलायां च स्वामिना कृतमद्भुतं
अमृतानन्द नाम्नैको भक्तो रोगेण पीडितः।।

स्वामी तु भेषजं सृष्ट्रवा कारुण्येन च दत्तवान्
स भक्त्या भेषजं भुक्त्वा रोगमुक्तोऽभवत् चिरं।।

भगवन्तस्य पुत्रस्य शस्त्रक्रिया विनिश्चिता
करणानि स्वयं सृष्ट्रवा स्वामी तां कृतवान् स्वयं।।

डाक्टर् शन्कर् च नामान्यः भक्तो रोगेण पीडितः
शरीरान्तर्गतो स्वामी चिकित्सां कृतवान् स्वयं।।

कारुण्यानन्दनाम्ना च स्वामिनश्चाश्रमे पुरा
आतुरालयमेकं च भक्तेभ्यो निर्मितं मुदा।।

तस्य मार्गेषु सर्वेषु प्रकोष्ठेष्वपि सन्ततं
स्वामिनो वर्णचित्राणि भक्तेभ्यो दर्शितनि च।।

तत्रैका वनिता याता पूर्णगर्भा च सत्वरं
तस्य प्रसवकार्याय सा च तत्र प्रवेशिता।।

सेविके वनिते द्वे च चलच्चित्राय निर्गते
तस्मिन्नवसरे तस्या श्चाभूत् प्रसववेदना।।

तस्याः पीडानिवृत्यर्थं स्वामी चित्रात् विनिर्गतः
तस्याः प्रसवकार्याणि स्वामिनैव कृतानि च।।

नवजातशिशोः स्नानं स्वामिनैव कृतं मुदा
तत् पश्चात् निर्गतो स्वामी चित्रे अन्तर्गतोपि च।।

चमत्कारमिदं श्रुत्वा सेविकाः वनिताः स्वयं
आश्चर्यचकिताः भूत्वा स्वामिभक्ताः बभूवु च।।

स्वामिनो अवतारोयं, सत्यनारायणस्य च
भक्तसंरक्षणायैव भक्तिसंवर्धनाय च।।

तस्य भक्ताः वयं सर्वे पूर्वपुण्यकृतेन वै
प्रेमलालनसौभाग्याः प्राप्तवन्तश्च स्वामिनः।।

प्रेमैव स्वामिनो भावो स्वरुपं सत्यमेव च
भक्तिधर्मपथे निष्ठाः रक्षिताः सर्वथा सदा।।

सर्वनामानि तस्यैव अल्ला ईशा महेश्वरः
तथा सर्वाणि रुपाणि घृत्वा दर्शितवान् स्वयं।।

स्वामी सर्वेषु भक्तेषु कृपां वर्षति सर्वदा
तेषां सन्कल्पपूर्तिं च करोति प्रेमपूर्वकं।।

सत्येन सह धर्मेण प्रेम्णा शान्त्या च निर्भरा
विद्या भवति सम्पूर्णा दानं चापि महत्तरं।।

सत्यं प्रेमश्च धर्मश्च शान्तिश्चापि चतुष्टयं
स्तूपाः धर्मस्य वर्तन्ते स्थापनव्यापनाय च।।

समर्पयाम्यहं काव्यं श्रद्धाभक्ति समन्वितं
सायिपादारविन्दाभ्यां सत्यसायिकथामृतं।।

भवतु भवतु शान्तिः सर्वालोकाय नूनं
सरतु सरतु प्रेम सर्वलोकस्य चित्ते

चरतु चरतु धर्म सर्वभूतस्तु लोके
जयतु जयतु सत्य सायि बाबा नमस्ते।।

**शुभमस्तु**

**Copyright (English) 2002. Prasanthi Jyoti.**
**Composed in SANSKRIT POETRY by Prof. Muralidharan N.K.**
**Corrected by Dr. E. N. Easwaran Namboothiri**
**Website: http://www.sathyasaikatha.com**
**Email: prasanthijyoti@gmail.com**